श्रीमते रामानुजाय नमः

# ॥ श्री वेङ्कटेश प्रपत्तिः ॥

* ईशानां जगतोऽस्य वेङ्कटपतेः विष्णोः परां प्रेयसीं
तद्वक्षस्थल नित्यवास रसिकां तत्क्षान्ति संवर्धनीम्।
पद्मालङ्कृत पाणिपल्लवयुगां पद्मासनस्थां श्रियं
वात्सल्यादि गुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम्॥ १

श्रीमन् कृपाजलनिधे कृतसर्वलोक
सर्वज्ञ शक्त नतवत्सल सर्वशेषिन्।
स्वामिन् सुशील सुलभाश्रित पारिजात
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ २

आनूपुरार्पित सुजात सुगन्धि पुष्प -
सौरभ्य सौरभकरौ समसन्निवेशौ।
सौम्यौ सदाऽनुभवनेऽपि नवानुभाव्यौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ ३

सद्यो विकासि समुदित्वर सान्द्र राग -
सौरभ्य निर्भर सरोरुह साम्व्यवार्ताम्।
संयक्षु साहसपदेषु विलेखयन्तौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ ४

रेखामय ध्वज सुधा कलशातपत्र -
वज्राङ्कुशाम्बुरुह कल्पक शङ्ख चक्रैः।
भव्यैरलङ्कृत तलौ परतत्व चिह्नैः
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ ५

ताम्रोदरद्युति पराजित पद्मरागौ
बाह्यैर्महोभिरभिभूत महेन्द्र नीलौ।
उद्यन्नखाम्शुभि रुदस्त शशाङ्क भासौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ ६

सप्रेमभीति कमला करपल्लवाभ्यां
संवाहनेऽपि सपदि क्लम मादधानौ।
कान्तावबाङ्मनसगोचर सौकुमार्यौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ ७

लक्ष्मी मही तदनुरूप निजानुभाव -
नीलादि दिव्यमहिषी करपल्लवनाम्।
आरुण्य सङ्क्रमणतः किल सान्द्ररागौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ ८

नित्यानमद्विधि शिवादि किरीट कोटि -
प्रत्युप्त दीप्त नवरत्न महःप्ररोहैः।
नीराजनाविधिमुदार पाददानौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ ९

विष्णोः पदे परम इत्युदितप्रशंसौ
यौ मध्व उत्स इति भोग्यतयाऽप्युपात्तौ।
भूयस्थथेति तव पाणितलप्रदिष्टौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ १०

पार्थाय तत्सदृश सारथिना त्वयैव

यौ दर्शितौ स्वचरणौ शरणं व्रजेति।
भूयोऽपि मह्यमिहतौ करदर्शितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ ११

मन्मूर्धि कालियफणे विकटाटवीषु
श्रीवेङ्कटाद्रि शिखरे शिरसि श्रुतीनाम्।
चित्तेप्यनन्य मनसां सममाहितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ १२

अंलान हृष्यदवनीतल कीर्ण पुष्पौ
श्रीवेङ्कटाद्रि शिखराभरणायमानौ।
आनन्दिताखिल मनो नयनौ तवैतौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ १३

प्रायः प्रपन्न जनता प्रथमावगाह्यौ
मातुः स्तनाविव शिशोरमृताय मानौ।
प्राप्तौ परस्पर तुलामतुलान्तरौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ १४

सत्वोत्तरैस्सतत सेव्य पदाम्बुजेन
संसार तारक दयार्द्र दृगञ्चलेन।
सौम्यो पयन्तृ मुनिना मम दर्शितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये॥ १५

* श्रीश श्रिया घटिकया त्वदुपायभावे
प्राप्ये त्वयि स्वयमुपेयतया स्फुरन्त्या।

श्रीमते रामानुजाय नमः

नित्याश्रिताय निरवध्यगुणाय तुभ्यं
स्यां किङ्करो वृषगिरीश न जातु मह्यम्॥ १६

**॥ इति श्री वेङ्कटेश प्रपत्तिः संपूर्णम्॥**